तावकः-विका, तावकः-विका, [1]तुतुषकः-षिका, [2]तोतूयकः-यिका ;
तोता-त्री, तावयिता-त्री, तुतूषिता-त्री, तोतूयिता-त्री ;
[3]उतुवन्-ती, तावयन्-न्ती, तुतूषन्-न्ती ; —
तोष्यन्-न्ती-ती, तावयिष्यन्-न्ती-ती, तुतूषिष्यन्-न्ती-ती ; —
— तावयमानः, तावयिष्यमाणः, — तोतूयमानः, तोतूयिष्यमाणः ;
[4]संतुत्-संतुद्-संतुतौ-संतुतः ; — —
तुतम्-तुतः, तावितः, तुतूषितः, तोतूयितः-तवान् ;
तवः, तावः, तुतूषुः, तोतुवः ;
तोतव्यम्, तावयितव्यम्, तुतूषितव्यम्, तोतूयितव्यम् ;
तवनीयम्, तावनीयम्, तुतूषणीयम्, तोतूयनीयम् ;
तव्यम्, [5]अवश्यताव्यम्, ताव्यम्, तुतूष्यम्, तोतूय्यम् ;
ईषत्तवः-दुस्तवः-सुतवः ; — —
तूयमानः, ताव्यमानः, तुतूष्यमाणः, तोतूय्यमानः ;
तवः, तावः, तुतूषः, तोतूयः ;
तोतुम्, तावयितुम्, तुतूषितुम्, तोतूयितुम् ;
तुतिः, तावना, तुतूषा, तोतूया ;
तवनम्, तावनम्, तुतूषणम्, तोतूयनम् ;
तुत्वा, तावयित्वा, तुतूषित्वा, तोतूयित्वा ;
प्रतुत्य, प्रताव्य, प्रतुतूष्य, प्रतोतूय्य ;

---

1. 'इको झल्' (1-2-9) इति सनः कित्वान्न गुणः । 'अज्झनगमां सनि' (6-4-16) इति दीर्घः। षत्वम् । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।
2. 'गुणो यङ्लुकोः' (7-4-82) इत्यभ्यासे गुणः । 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।
3. 'लुग्विकरणेऽदादौ धातोरस्य पाठ इति व्याख्यातृभिरुक्तत्वात् 'अदिप्रभृतिभ्यः शपः' (2-4-72) इति लुक् । शतुर्ङिद्वद्भावान्न गुणः । 'अचि श्नुधातुभ्रुवां—' (6-4-77) इत्युवङ् ।
4. क्विपि, 'ह्रस्वस्य पिति कृति—' (6-1-71) इति तुक् । एवं ल्यप्यपि ज्ञेयम् ।
5. 'ओरावश्यके' (3-1-125) इति ण्यत् । 'लुम्पेदवश्यमः कृत्ये—' (वा. 6-3-109) इति पृषोदरादिषु पाठात् अवश्यमो मकारस्य लोपः ।